सप्तमः पाठः

# सङ्कल्पः सिद्धिदायकः

धातुप्रयोगः

नारदवचनप्रभावात् पार्वती शिवं पतिरूपेण इच्छन्ती तपस्यां कर्त्तुम् इच्छति स्म। सा स्वसङ्कल्पं मात्रे न्यवेदयत्। तच्छ्रुत्वा पार्वत्याः माता चिन्ताकुला अभवत्।

पुत्र्याः कोमलतनुं दृष्ट्वा जननी आदिशत्-'वत्से! क्व कठिनं तपः क्व च तव कोमलं शरीरम्? कथम् आतपात् शीतात् वा आत्मानं रक्षिष्यसि? तर्हि तपः मा चर। सुखेन स्वगृहे एव वस। अत्रैव व्रतादिकं कुरु। एतेनैव तव मनोरथपूर्तिः भविष्यति।'

परन्तु पार्वती अकथयत्-''अम्ब! शिवं पतिरूपेण प्राप्तुं तपस्यामेव करिष्यामि इति मे सङ्कल्पः। ईश्वरः मम रक्षां करिष्यति। तपस्यार्थं कोऽपि न गृहे वसति।'' एवमुक्त्वा दृढनिश्चया सा पितृगृहं परित्यज्य कानने निर्मितां स्वपर्णकुटीम् अगच्छत् शिवं च अनन्यमनसा अपूजयत्, चिरं तपस्यां च समाचरत्। कानने हिंस्राः पशवः विचरन्ति स्म। तथापि पार्वती निर्भया वसति स्म। यतो हि निर्भयं जनम् ईश्वरः स्वयमेव रक्षति।



कतिचित् मासाः गताः। एकदा कश्चित् वटुः तपोवनं प्राविशत्। वटुं दृष्ट्वा पार्वती आसनात् उत्थाय तमुपगम्य सादरम् अवदत्-''वटो, स्वागतं ते। उपविशतु भवान्।''

वटुः कुशलं पृष्ट्वा कौतूहलेन अपृच्छत्-''हे तपस्विनि! किमर्थं कठिनं तपः समाचरसि? स्वकीयां तनुं च मलिनां करोषि?'' पार्वती न किञ्चित् वदति स्म। तत्सखी एव तस्याः सङ्कल्पस्य प्रयोजनं वटवे निवेदयति स्म।

तत् श्रुत्वा वटुः अपृच्छत्-''अयि पार्वति! किं सत्यमेव त्वं शिवं पतिमिच्छसि यो हि अशिवं चरति, श्मशाने वसति? यस्य त्रीणि नेत्राणि, यस्य वसनं गजचर्म, यस्य अङ्गरागः चिताभस्म, यस्य परिजनाश्च भूतगणाः, किं तमेव शिवं पतिम् इच्छसि?''

शिवनिन्दां श्रुत्वा पार्वती क्रुद्धा जाता। सा अवदत्-''अपसर अरे वाचाल! त्वं महेश्वरस्य परमार्थस्वरूपमेव न जानासि। जनाः अनादिकालात् सङ्कल्पसिद्धये शिवमेव पूजयन्ति। तत् नोचितं त्वया सह सम्भाषणम्।''



एवमुक्त्वा यदा सा प्रस्थानाय उद्यता, तावदेव शिवः वटोः रूपं परित्यज्य तस्याः मार्गम् अवरुध्य अवदत्-''पार्वति! प्रीतोऽस्मि तव सङ्कल्पेन तपस्यया च।''

## शब्दार्थाः

| | | |
|---|---|---|
| **इच्छन्ती** | – | इच्छा करती हुई |
| **कर्त्तुम्** | – | करने के लिए |
| **इच्छति स्म** | – | इच्छा की |
| **मात्रे** | – | माता से/माता को |
| **तच्छ्रुत्वा** (तत् + श्रुत्वा) | – | यह सुनकर |
| **पुत्र्याः** | – | पुत्री का/के/की |
| **आदिशत्** | – | आदेश दिया |
| **क्व** | – | कहाँ |
| **आतपात्** | – | धूप से |
| **आत्मानम्** | – | स्वयं को |
| **व्रतादिकम्** (व्रत + आदिकम्) | – | उपवास आदि को |
| **अम्ब!** | – | हे माँ! |
| **प्राप्तुम्** | – | प्राप्त करने के लिए |
| **तपस्यार्थम्** (तपस्या + अर्थम्) | – | तपस्या के लिए |
| **कोऽपि** (कः + अपि) | – | कोई |
| **परित्यज्य** | – | छोड़कर |
| **कानने** | – | वन में/जङ्गल में |
| **स्वपर्णकुटीम्** | – | अपने पत्तों की कुटिया में |
| **अनन्यमनसा** | – | एकाग्र चित्त से |
| **चिरम्** | – | बहुत समय तक |
| **समाचरत्** | – | करने लगी/करने लगा |
| **यतो हि** | – | क्योंकि |

| | | |
|---|---|---|
| **कतिचित्** | – | कुछ |
| **वटुः** | – | ब्रह्मचारी |
| **प्राविशत्** | – | प्रवेश किया/आया |
| **उत्थाय** | – | उठकर |
| **तमुपगम्य** (तम् + उपगम्य) | – | उसके पास जाकर |
| **उपविशतु** | – | बैठो/बैठे |
| **पृष्ट्वा** | – | पूछकर |
| **समाचरसि** | – | करती हो/करते हो |
| **वदति स्म** | – | बोलती थी/बोलता था |
| **अशिवम्** | – | अमङ्गल |
| **वसनम्** | – | कपड़ा/वस्त्र |
| **गजचर्म** | – | हाथी का चमड़ा |
| **अङ्गरागः** | – | सौन्दर्य सामग्री |
| **परिजनाश्च** (परिजनाः + च) | – | सेवक आदि |
| **भूतगणाः** | – | भूतप्रेत आदि |
| **अपसर** | – | दूर हटो |
| **परमार्थस्वरूपमेव** (परम + अर्थस्वरूपम् + एव) | – | दिव्य रूप को ही/यथार्थ स्वरूप को ही |
| **सङ्कल्पसिद्धये** | – | सङ्कल्प को पूरा करने के लिए |
| **नोचितम्** (न + उचितम्) | – | उचित (ठीक) नहीं है |
| **प्रस्थानाय** | – | जाने के लिए |
| **उद्यता** | – | तैयार हुई |
| **तावदेव** (तावत् + एव) | – | तभी |
| **अवरुध्य** | – | रोककर |
| **प्रीतोऽस्मि** (प्रीतः + अस्मि) | – | प्रसन्न हूँ |

## अभ्यासः



**1. उच्चारणं कुरुत-**

| | | |
|---|---|---|
| अभवत् | अकथयत् | अगच्छत् |
| न्यवेदयत् | अपूजयत् | समाचरत् |
| आदिशत् | प्राविशत् | अवदत् |
| वदति स्म | वसति स्म | रक्षति स्म |
| निवेदयति स्म | चरति स्म | करोति स्म |
| गच्छति स्म | पूजयति स्म | पठति स्म |

**2. उदाहरणम् अनुसृत्य रिक्तस्थानानि पूरयत-**

**(क)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा- | वसति स्म | वसतः स्म | वसन्ति स्म |
| | पूजयति स्म | ................ | ................ |
| | ................ | रक्षतः स्म | ................ |
| | चरति स्म | ................ | ................ |
| | ................ | ................ | कुर्वन्ति स्म |

**(ख)**

| | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| यथा- | प्रथमपुरुषः | अकथयत् | अकथयताम् | अकथयन् |
| | प्रथमपुरुषः | ................ | अपूजयताम् | अपूजयन् |
| | प्रथमपुरुषः | अरक्षत् | ................ | ................ |

| (ग) पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा- मध्यमपुरुषः | अवसः | अवसतम् | अवसत |
| मध्यमपुरुषः | ................. | अपूजयतम् | ................. |
| मध्यमपुरुषः | ................. | ................. | अचरत |

| (घ) पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा- उत्तमपुरुषः | अपठम् | अपठाव | अपठाम |
| उत्तमपुरुषः | अलिखम् | ................. | ................. |
| उत्तमपुरुषः | ................. | अरचयाव | ................. |

**3. प्रश्नानाम् उत्तराणि एकपदेन लिखत-**

(क) निर्भयं जनं कः स्वयमेव रक्षति?

(ख) पार्वती तपस्यार्थं कुत्र अगच्छत्?

(ग) कः अशिवं चरति?

(घ) शिवनिन्दां श्रुत्वा का क्रुद्धा जाता?

(ङ) वटुरूपेण तपोवनं कः प्राविशत्?

**4. कः/का कं/कां प्रति कथयति-**

| | कः/का | कम्/काम् |
|---|---|---|
| यथा- वत्से! क्व कठिनं तपः? | माता | पार्वतीम् |
| (क) अम्ब! पतिरूपेण शिवं प्राप्तुं तपस्यां करिष्यामि। | ............. | ............. |
| (ख) अत्रैव व्रतादिकं कुरु। | ............. | ............. |
| (ग) अयि पार्वति! सत्यमेव त्वं शिवं पतिमिच्छसि? | ............. | ............. |
| (घ) अपसर, अरे वाचाल! | ............. | ............. |
| (ङ) पार्वति! प्रीतोऽस्मि तव तपस्यया। | ............. | ............. |

5. **प्रश्नानाम् उत्तराणि लिखत–**

(क) वटुं दृष्ट्वा पार्वती सादरं किम् अवदत्?

(ख) वटुः पार्वतीं किम् अपृच्छत्?

(ग) नारदवचनप्रभावात् पार्वती किं कर्त्तुम् ऐच्छत्?

6. **मञ्जूषातः पदानि चित्वा समानार्थकानि पदानि लिखत–**

| माता | दृष्ट्वा | कानने | जन्तवः | नेत्राणि |
|---|---|---|---|---|

| | |
|---|---|
| वने | .................. |
| पशवः | .................. |
| जननी | .................. |
| नयनानि | .................. |
| विलोक्य | .................. |

7. **उदाहरणानुसारं पदरचनां कुरुत–**

| | | |
|---|---|---|
| **यथा –** वसति स्म | = | अवसत् |
| (क) पश्यति स्म | = | ..................... |
| (ख) लिखति स्म | = | ..................... |
| (ग) चिन्तयति स्म | = | ..................... |
| (घ) वदति स्म | = | ..................... |
| (ङ) गच्छति स्म | = | ..................... |

| | | |
|---|---|---|
| **यथा**– अलिखत् | = | लिखति स्म। |
| (क) ................. | = | कथयति स्म। |
| (ख) ................. | = | नयति स्म। |
| (ग) ................. | = | पठति स्म। |
| (घ) ................. | = | धावति स्म। |
| (ङ) ................. | = | हसति स्म। |



## ध्यातव्यम्–

**'स्म' इत्यस्य प्रयोगः।**

**यदा वर्तमानकालिकैः धातुभिः सह 'स्म' इत्यस्य प्रयोगः भवति तदा ते धातवः भूतकालिकक्रियाणाम् अर्थं प्रकटयन्ति।**

| | | | |
|---|---|---|---|
| **यथा**– | **पठति स्म** | – | **पढ़ता था।** |
| | **गच्छति स्म** | – | **जाता था।** |